# Garuda Upanishad

# ગરુડોપનિષત્

## Document Information

Text title : Garuda Upanishad

File name : garuda.itx

Category : upanishhat, svara, deities_misc

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 102 / 108; Atharva Veda - Vaishnava upanishad.

Latest update : August 15, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

Garuda Upanishad

# ગરુડોપનિષત્

વિષં બ્રહ્માતિરિક્તં સ્યાદમૃતં બ્રહ્મમાત્રકમ્ ।
બ્રહ્માતિરિક્તં વિષવદ્બ્રહ્મમાત્રં ખગેઽહમ્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ ॥ ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ॥

સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિઃ ॥ વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ॥ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ॥

સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ ॥ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥ ગારુડબ્રહ્મવિદ્યાં પ્રવક્ષ્યામિ યાં બ્રહ્મા વિદ્યાં
નારદાય પ્રોવાચ નારદો બૃહત્સેનાય બૃહત્સેન ઇન્દ્રાય ઇન્દ્રો
ભરદ્વાજાય ભરદ્વાજો જીવત્કામેભ્યઃ શિષ્યેભ્યઃ પ્રાયચ્છત્ ।
અસ્યાઃ શ્રીમહાગરુડબ્રહ્મવિદ્યાયા બ્રહ્મા ઋષિઃ । ગાયત્રી છન્દઃ ।
શ્રીભગવાન્મહાગરુડો દેવતા । શ્રીમહાગરુડપ્રીત્યર્થે મમ
સકલવિષવિનાશનાર્થે જપે વિનિયોગઃ । ૐ નમો ભગવતે
અઙ્ગુષ્ઠાભ્યાં નમઃ । શ્રી મહાગરુડાય તર્જનીભ્યાં સ્વાહા ।
પક્ષીન્દ્રાય મધ્યમાભ્યાં વષટ્ । શ્રીવિષ્ણુવલ્લભાય
અનામિકાભ્યાં હુમ્ । ત્રૈલોક્ય પરિપૂજિતાય કનિષ્ઠિકાભ્યાં વૌષટ્ ।
ઉગ્રભયઙ્કરકાલાનલરૂપાય કરતલકરપૃષ્ઠાભ્યાં ફટ્ ।
એવં હૃદયાદિન્યાસઃ । ભૂર્ભુવઃ સુવરોમિતિ દિગ્બન્ધઃ । ધ્યાનમ્ ।
સ્વસ્તિકો દક્ષિણં પાદં વામપાદં તુ કુઞ્ચિતમ્ ।
પ્રાઞ્જલીકૃતદોર્યુગ્મં ગરુડં હરિવલ્લભમ્ ॥ ૧॥

અનન્તો વામકટકો યજ્ઞસૂત્રં તુ વાસુકિઃ ।
તક્ષકાઃ કટિસૂત્રં તુ હારઃ કાર્કોટ ઉચ્યતે ॥ ૨॥

પદ્મો દક્ષિણકર્ણે તુ મહાપદ્મસ્તુ વામકે ।

શઙ્ખઃ શિરઃપ્રદેશે તુ ગુલિકસ્તુ ભુજાન્તરે ॥ ૩॥

પૌણ્ડ્રકાલિકનાગાભ્યાં ચામરાભ્યાં સ્વીજિતમ્ ।
એલાપુત્રકનાગાદ્યૈઃ સેવ્યમાનં મુદાન્વિતમ્ ॥ ૪॥

કપિલાક્ષં ગરુત્મન્તં સુવર્ણસદૃશપ્રભમ્ ।
દીર્ઘબાહું બૃહત્સ્કન્ધં નાદાભરણભૂષિતમ્ ॥ ૫॥

આજાનુતઃ સુવર્ણાભમાકટ્યોસ્તુહિનપ્રભમ્ ।
કુઙ્કુમારુણમાકણ્ઠં શતચન્દ્ર નિભાનનમ્ ॥ ૬॥

નીલાગ્રનાસિકાવક્ત્રં સુમહચ્ચારુકુણ્ડલમ્ ।
દંષ્ટ્રાકરાલવદનં કિરીટમુકુટોજ્જ્વલમ્ ॥ ૭॥

કુઙ્કુમારુણસર્વાઙ્ગં કુન્દેન્દુધવલાનનમ્ ।
વિષ્ણુવાહ નમસ્તુભ્યં ક્ષેમં કુરુ સદા મમ ॥ ૮॥

એવં ધ્યાયેત્રિસન્ધ્યાસુ ગરુડં નાગભૂષણમ્ ।
વિષં નાશયતે શીઘ્રં તૂલરશિમિવાનલઃ ॥ ૯॥

ઓમીમોં નમો ભગવતે શ્રીમહાગરુડાય પક્ષીન્દ્રાય
વિષ્ણુવલ્લભાય ત્રૈલોક્યપરિપૂજિતાય ઉગ્રભયંકરકાલાનલરૂપાય
વજ્રનખાય વજ્રતુણ્ડાય વજ્રદન્તાય વજ્રદંષ્ટ્રાય
વજ્રપુચ્છાય વજ્રપક્ષાલક્ષિતશરીરાય ઓમીકેહ્યેહિ
શ્રીમહાગરુડાપ્રતિશાસનાસ્મિન્નાવિશાવિશ દુષ્ટાનાં
વિષં દૂષયદૂષય સ્પૃષ્ટાનાં નાશયનાશય
દન્દશૂકાનાં વિષં દારયદારય પ્રલીનં વિષં
પ્રણાશયપ્રણાશય સર્વવિષં નાશયનાશય હનહન
દહદહ પચપચ ભસ્મીકુરુભસ્મીકુરુ હું ફટ્ સ્વાહા ॥

ચન્દ્રમણ્ડલસંકાશ સૂર્યમણ્ડલમુષ્ટિક ।
પૃથ્વીમણ્ડલમુદ્રાઙ્ગ શ્રીમહાગરુડાય વિષં
હરહર હું ફટ્ સ્વાહા ॥ ૐ ક્ષિપ સ્વાહા ॥ ઓમીં
સચરતિ સચરતિ તત્કારી મત્કારી વિષાણાં ચ વિષરૂપિણી
વિષદૂષિણી વિષશોષણી વિષનાશિની વિષહારિણી
હતં વિષં નષ્ટં વિષમન્તઃપ્રલીનં વિષં પ્રનષ્ટં
વિષં હતં તે બ્રહ્મણા વિષં હતમિન્દ્રસ્ય વજ્રેણ સ્વાહા ॥

ૐ નમો ભગવતે મહાગરુડાય વિષ્ણુવાહનાય
ત્રૈલોક્યપરિપૂજિતાય વજ્રનખવજ્રતુણ્ડાય વજ્રપક્ષાલંકૃત-
શરીરાય એહ્યેહિ મહાગરુડ વિષં છિન્ધિચ્છિન્ધિ
આવેશયાવેશય હું ફટ્ સ્વાહા ॥

સુપર્ણોઽસિ ગરુત્માત્રિવૃત્તે શિરો ગાયત્રં ચક્ષુઃ સ્તોમ આત્મા
સામ તે તનૂર્વામદેવ્યં બૃહદ્રથન્તરે પક્ષૌ યજ્ઞાયજ્ઞિયં
પુચ્છં છન્દાંસ્યઙ્ગાનિ ધિષ્ણિયા શફા યજૂંશિ નામ ॥

સુપર્ણોઽસિ ગરુત્માન્દિવં ગચ્છ સુવઃ પત ઓમીં બ્રહ્મવિદ્યા-
મમાવાસ્યાયાં પૌર્ણમાસ્યાં પુરોવાચ સચરતિ સચરતિ
તત્કારી મત્કારી વિષનાશિની વિષદૂષિણી વિષહારિણી હતં
વિષં નષ્ટં વિષં પ્રનષ્ટં વિષં હતમિન્દ્રસ્ય વજ્રેણ સ્વાહા ॥

તસ્યમ્ । યદ્યનન્તકદૂતોઽસિ યદિ વાનન્તકઃ સ્વયં સચરતિ સચરતિ
તત્કારી મત્કારી વિષનાશિની વિષદૂષિણી હતં વિષં નષ્ટં
વિષં હતમિન્દ્રસ્ય વજ્રેણ વિષં હતં તે બ્રહ્મણા વિષમિન્દ્રસ્ય
વજ્રેણ સ્વાહા ।
યદિ વાસુકિદૂતોઽસિ યદિ વા વાસુકિઃ સ્વયં સચરતિ સચરતિ
તત્કારી મત્કારી વિષનાશિની વિષદૂષિણી હતં વિષં
નષ્ટં વિષં હતમિન્દ્રસ્ય વજ્રેણ વિષં હતં તે બ્રહ્મણા
વિષમિન્દ્રસ્ય વજ્રેણ સ્વાહા યદિ વા તક્ષકઃ સ્વયં સચરતિ
સચરતિ તત્કારી મત્કારી વિષનાશિની વિષદૂષિણી હતં વિષં
નષ્ટં વિષં હતમિન્દ્રસ્ય વજ્રેણ વિષં હતં બ્રહ્મણા
વિષમિન્દ્રસ્ય વજ્રેણ સ્વાહા ॥

યદિ કર્કોટકદૂતોઽસિ યદિ વા કર્કોટકઃ સ્વયં સચરતિ સચરતિ
તત્કારી મત્કારી વિષનાશિની વિષદૂષિણી હતં વિષં નષ્ટં વિષં
હતમિન્દ્રસ્ય વજ્રેણ વિષં હતં તે બ્રહ્મણા વિષમિન્દ્રસ્ય વજ્રેણ સ્વાહા ॥

યદિ પદ્મકદૂતોઽસિ યદિ વા પદ્મકઃ સ્વયં સચરતિ સચરતિ
તત્કારી મત્કારી વિષનાશિની વિષદૂષિણી હતં વિષં
નષ્ટં વિષં હતમિન્દ્રસ્ય વજ્રેણ વિષં હતં તે બ્રહ્મણા
વિષમિન્દ્રસ્ય વજ્રેણ સ્વાહા ॥

યદિ મહાપદ્મકદૂતોઽસિ યદિ વા મહાપદ્મકઃ સ્વયં

સચરતિ સચરતિ તત્કારી મત્કારી વિષનાશિની વિષદૂષિણી હતં
વિષં નષ્ટં વિષં હતમિન્દ્રસ્ય વજ્રેણ વિષં હતં તે બ્રહ્મણા
વિષમિન્દ્રસ્ય વજ્રેણ સ્વાહા ॥

યદિ શઙ્ખકદૂતોઽસિ યદિ વા શઙ્ખકઃ સ્વયં
સચરતિ સચરતિ તત્કારી મત્કારી વિષનાશિની વિષદૂષિણી
હતં વિષં નષ્ટં વિષં હતમિન્દ્રસ્ય વજ્રેણ વિષં
હતં તે બ્રહ્મણા વિષમિન્દ્રસ્ય વજ્રેણ સ્વાહા ॥

યદિ ગુલિકદૂતોઽસિ યદિ વા ગુલિકઃ સ્વયં સચરતિ સચરતિ
તત્કારી મત્કારી વિષનાશિની વિષદૂષિણી વિષહારિણી
હતં વિષં નષ્ટં વિષં હતમિન્દ્રસ્ય વજ્રેણ વિષં
હતં તે બ્રહ્મણા વિષમિન્દ્રસ્ય વજ્રેણ સ્વાહા ॥

યદિ પૌણ્ડ્રકાલિકદૂતોઽસિ યદિ વા પૌણ્ડ્રકાલિકઃ સ્વયં
સચરતિ સચરતિ તત્કારી મત્કારી વિષનાશિની વિષદૂષિણી
વિષહારિણી હતં વિષં નષ્ટં વિષં હતમિન્દ્રસ્ય વજ્રેણ
વિષં હતં તે બ્રહ્મણા વિષમિન્દ્રસ્ય વજ્રેણ સ્વાહા ॥

યદિ નાગકદૂતોઽસિ યદિ વા નાગકઃ સ્વયં સચરતિ સચરતિ
તત્કારી મત્કારી વિષનાશિની વિષદૂષિણી વિષહારિણી હતં
વિષં નષ્ટં વિષં હતમિન્દ્રસ્ય વજ્રેણ વિષં હતં તે
બ્રહ્મણા વિષમિન્દ્રસ્ય વજ્રેણ સ્વાહા ॥

યદિ લૂતાનાં પ્રલૂતાનાં યદિ વૃશ્ચિકાનાં યદિ ઘોટકાનાં
યદિ સ્થાવરજઙ્ગમાનાં સચરતિ સચરતિ તત્કારી મત્કારી
વિષનાશિની વિષદૂષિણી વિષહારિણી હતં વિષં નષ્ટં
વિષં હતમિન્દ્રસ્ય વજ્રેણ વિષં હતં તે બ્રહ્મણા વિષમિન્દ્રસ્ય
વજ્રેણ સ્વાહા । અનન્તવાસુકિતક્ષકકર્કોટકપદ્મકમહાપદ્મક-
શઙ્ખકગુલિકપૌણ્ડ્રકાલિકનાગક ઇત્યેષાં દિવ્યાનાં
મહાનાગાનાં મહાનાગાદિરૂપાણાં વિષતુણ્ડાનાં વિષદન્તાનાં
વિષદંષ્ટ્રાણાં વિષાઙ્ગાનાં વિષપુચ્છાનાં વિશ્વચારાણાં
વૃશ્ચિકાનાં લૂતાનાં પ્રલૂતાનાં મૂષિકાણાં ગૃહગૌલિકાનાં
ગૃહગોધિકાનાં ઘ્રણાસાનાં ગૃહગિરિગહ્વરકાલાનલવલ્મીકોદ્ભૂતાનાં
તાર્ણાનાં પાર્ણાનાં કાષ્ઠદારુવૃક્ષકોટરસ્થાનાં

મૂલત્વગ્દારુનિર્યાસપત્રપુષ્પફલોદ્ભૂતાનાં દુષ્ટકીટકપિશ્વાન-
માર્જારજંબુકવ્યાઘ્રવરાહાણાં જરાયુજાણ્ડજોદ્ભિજ્જસ્વેદજાનાં
શસ્ત્રબાણક્ષતસ્ફોટવ્રણમહાવ્રણકૃતાનાં કૃત્રિમાણામન્યેષાં
ભૂતવેતાલકૂષ્માણ્ડપિશાચપ્રેતરાક્ષસયક્ષભયપ્રદાનાં
વિષતુણ્ડદંષ્ટ્રાનાં વિષાઙ્ગાનાં વિષપુચ્છાનાં વિષાણાં
વિષરૂપિણી વિષદૂષિણી વિષશોષિણી વિષનાશિની વિષહારિણી
હતં વિષં નષ્ટં વિષમન્તઃપ્રલીનં વિષં પ્રનષ્ટં વિષં હતં તે
બ્રહ્મણા વિષમિન્દ્રસ્ય વજ્રેણ સ્વાહા । ય ઇમાં બ્રહ્મવિદ્યામમાવાસ્યાયાં
પઠેચ્છૃણુયાદ્વા યાવજ્જીવં ન હિંસન્તિ સર્પાઃ । અષ્ટૌ બ્રાહ્મણાન્ગ્રાહયિત્વા
તૃણેન મોચયેત્ । શતં બ્રાહ્મણાન્ગ્રાહયિત્વા ચક્ષુષા મોચયેત્ ।
સહસ્રં બ્રાહ્મણાન્ગ્રાહયિત્વા મનસા મોચયેત્ । સર્પાઞ્જલે ન મુઞ્ચન્તિ ।
તૃણે ન મુઞ્ચન્તિ । કાષ્ઠે ન મુઞ્ચન્તીત્યાહ ભગવાન્બ્રહ્મેત્યુપનિષત્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ ॥ ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ॥

સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિઃ ॥ વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ॥ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ॥

સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ ॥ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ હરિઃ ૐ તત્સત્ ॥

ઇતિ શ્રીગારુડોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Garuda Upanishad*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*